Hiralal Mazumdar Memorial College for Women, Dakshineswar, Kolkata – 700 035 LIBRARY

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 5th Semester Examination, 2020, held in 2021

## SANADSE01T-SANSKRIT (DSE1/2)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

सर्वेषां प्रश्नानाम् उत्तरं संस्कृतभाषया देवनागरलिप्या च देयम्।

क-विभागः

1. अधोलिखितेषु प्रश्नेषु यथेच्छं पञ्च प्रश्नाः समाधेयाः। 2×5 = 10

(क) रुद्रस्तुतिः कस्मिन् वेदे कस्मिन् अध्याये च वर्तते?

(ख) रुद्रशब्दस्य किं निर्वचनम् ? कश्च रुद्रशब्दस्य अर्थः?

(ग) 'गिरिशन्त' इति पदस्य कोऽर्थः ?

(घ) 'यथा नः सर्वमिज्जगदयक्ष्मं सुमना असत्'– इत्यत्र किमर्थं कस्य स्तुतिः क्रियते ?

(ङ) रुद्रदेवः 'ताम्रः' 'अरुणश्चे'ति कथमुच्यते ?

(च) 'नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे'– इत्यत्र 'नीलग्रीवाय' 'सहस्राक्षाय' चेति पदयोः कः अर्थः ?

(छ) रुद्रः कथं 'कपर्दी' इत्युच्यते ? तस्य आयुधद्वयं किम् ?

ख-विभागः

2. अधोलिखितेषु प्रश्नेषु यथेच्छमेकस्य प्रश्नस्य उत्तरं देयम्। 10×1 = 10

(क) मनुमत्स्यकथा कुत्र वर्तते ? अस्याः कथायाः वर्णनं कृत्वा वैदिकसाहित्येषु तस्याः गुरुत्वं प्रतिपादयत। 2+8

(ख) 'मत्स्य एव मत्स्यं गिलति'– केन कमुद्दिश्य किमर्थं च उक्तम् ? मनुमत्स्यकथामाधारीकृत्य प्लावनस्य वर्णनं कुरुत। 1+1+2+6

ग-विभागः

3. अध उद्धृतेषु यथेच्छं विषयमेकमाश्रित्य टीकां लिखत। 5×1 = 5

(क) मोहान्धकारविध्वंसात्।

(ख) कविसूक्तिरसायनानि।

(ग) उत्पथस्थितान्।

अथवा

अधः प्रदत्तेषु श्लोकेषु यथेच्छमेकः श्लोको व्याख्येयः। 5×1 = 5

(क) गोपायति क्षितिमिमां चतुरब्धिसीमां

पापाज्जुगुप्सत उदारमतिः सदैव।

वित्तं न गोपयति यस्तु वलीयकेभ्यो-

धीरो न गुप्यति महत्यपि कार्यजाते॥

(ख) यो व्रीणाति जयश्रियं रणमुखे धर्मं वृणीतेऽध्वरे

तेजोभिर्जगदावृणोति वरति ज्ञातीन् यथार्हैर्धनैः।

सत्कीर्तिञ्च वृणाति यो वरयति क्षेमं यशो व्रीयते

युद्धे वारयति द्विषो निवरते नित्यं प्रियोपद्रवम्॥

(ग) वृणते न परद्रव्यं गृह्णाति विदुषां गुणान्।

गर्हते हृदयं स्त्रीणां द्विषां गृहयते शिरः॥

घ-विभागः

4. अधो दत्तेषु विषयेषु यथेच्छमेकमाश्रित्य टिप्पनीं लिखत। 5×1 = 5

(क) भूर्भुवः सुवः।

(ख) शीक्षा।

(ग) ओम्।

अथवा

अधोलिखितेषु उपनिषद्वाक्येषु यथेच्छमेकं व्याख्येयम्। 5×1 = 5

(क) शीक्षां व्याख्यास्यामः। वर्णः स्वरः। मात्रा वलम्। साम सन्तानः। इत्युक्तः शीक्षाध्यायः।

(ख) ब्रह्मणः कोशोऽसि मेधया पिहितः। श्रुतं मे गोपाय।

(ग) सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः।

ङ-विभागः

5. यथेच्छमेकस्य प्रश्नस्योत्तरं विधेयम्। 10×1 = 10

(क) क आसीत् नाभानेदिष्ठः ? तत्सम्बन्धिनीम् आख्यायिकां समासेन वर्णयित्वा तत्कालीनसमाजचित्रम् उपस्थाप्यताम्। 1+9

(ख) नाभानेदिष्ठाख्यानं कस्मात् ग्रन्थात् संगृहीतम्। समासेन ग्रन्थस्यास्य विषयप्रतिपादनं कुरुत। 1+9

च-विभागः

6. अधः प्रदत्तेषु पदेषु यथेच्छं <u>द्वयोः</u> पदयोः रूपसाधनं कुरुत। 5×2 = 10

एडका, दात्री, विदुषी, गार्गी, इन्द्राणी।

अथवा

यथेच्छं <u>सूत्रद्वयं</u> व्याख्येयम्। 5×2 = 10

(क) अजाद्यतष्टाप्

(ख) उगितश्च

(ग) टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः।

(घ) षिद्गौरादिभ्यश्च।

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——